"गृहा वास्तुशास्त्रोदधौ राजयोग्या
यनन्ता हि सन्त्यत्र तेभ्यः कियन्तः ।
मयोक्ताश्च योग्या नृपाणां समृद्ध्यै
सुशोभान्वितास्ते च कल्याणदाश्च ॥
त्रिशालं गृहं दिक्त्रये पक्षयुग्मं
मुखे वीथिकाग्रे च षड् दारुमध्यम् ।
गुणालिन्दचातुर्द्दिशं चैकवक्त्रं
गवाक्षश्च कोणे च भद्रे विधेयम् ॥
मुखे भद्रके श्रीधरं माण्डयुक्तं
तथा भूमिका पञ्चसप्तैकभूम्याम् ।
विनाच्छादनं मण्डपं वेदवक्त्रै
रिपुघ्नं गृहं राज्यवर्द्धन्यमेतत ॥
मध्ये निम्नन्त्वङ्गणाग्रं तथोच्चैः
शस्तं दैवं पुत्रनाशाय गेहम् ।
स्तम्भश्रेणी मध्यमानेन कार्य्या
न्यूनाधिक्ये नैव पूज्या न च श्रीः ॥
हीनस्तम्भे शालयोर्बाह्यपट्टे
नो वेद्यः स्यादन्यतो वेध एव ।
भूमेर्द्दैर्घ्यं रुद्रसंख्याप्रमाणं
तुल्या नेष्टा वर्द्धमानाः शुभाः स्युः ॥
सार्द्धत्रयेन विभजेत् करतत्त्वसख्य-
मध्ये नवांशमुदितञ्च करार्द्धभित्तिः ।
स्तम्भाश्च षोड़शदृढेऽपि च भद्रकेषु
दन्तैर्मिताश्च सकलाश्च चतुर्मुखं स्यात् ॥
भद्रे च भूमिद्वयमूर्द्धमाण्डं
सार्द्धत्रिभूमं कथितञ्च गेहम् ।
प्रतापवर्द्धन्यमिदं नृपाणां
लक्ष्मीविलासञ्च वदामि तस्मात् ॥
स्तम्भा दश दश भद्रश्चैकं
षोड़शमध्ये तत्समरूपम् ।
मदनशरावनिमाण्डसमेतं
लक्ष्मीः कर्म्मकरोति च नित्यम् ॥
भागाः पञ्चगुणाश्च पञ्च भवनं षड्विंशता स्तम्भकैः
कुंभे चार्द्धपदे च नन्दपदकैर्भद्रं चतुर्द्वारकैः ।
भद्रे वैगुणभद्रकाणि सकलेऽष्टाशीतिका स्तम्भका.
माण्डं भूत्रितये च सार्द्धशरभूः स्याच्छ्रीनिवास गृहम् ॥
मध्ये स्तम्भशतञ्च भागसमके भित्तिश्चतुर्द्वारकं
सप्तांशाद्रिशरांशरामसहितं भद्रं चतुस्त्रिंशता।
षट्त्रिंशत् द्विशती च ते तु सकलः स्तम्भाः चितौ पूर्व्वतो
नाम्ना तत् कमलोद्भवञ्च कथितं भूम्यर्द्ध सप्तान्वितम् ॥
हर्म्यस्योदयकं विभज्य नवधा कुम्भी भवेद्भागतः
पादोनं भरणं शिरश्च कथितं पट्टः सपादो भवेत् ।
स्तम्भः षट्पदोनभाग उदितः कोणाष्टवृत्तस्तथा
भागार्द्धेन वयन्तिका निगदिता सा तस्य कम्पोपरि ॥
गृहस्योदयं दिग्विभागैर्विभाज्य
द्विभागेन कक्षासमं वेदिका स्यात् ।
त्रिभागेन तत्कण्ठतो निम्नमेवं
गृहस्योदयार्द्धेन पीठं नृपाणाम् ॥
उत्तानपट्टो नृपमन्दिरेऽसौ
हस्ते च हस्ते द्वियवोन्नतः स्यात् ।
पाषाणतः सौख्यकरो नृपाणां
धनक्षयं सोऽपि करोति गेहे ॥
सुपेष्टके शर्करया वियुक्ते
सकर्करैस्तैः सुदृढ़ा गृहे भूः ।
शस्ता न शस्तं भवनेषु चित्रं
कपोतगर्भाः कपिकाकरौद्रम् ॥
शुद्धोऽलिन्दविशेषतश्च सकला भूम्यैश्चरण्डान्विता
कार्य्येनाप्यथ मत्तवारणयुतं माण्डं तथार्द्धोदयम् ।
मौढ़ो भद्रचतुष्किकाभिरुदितो मण्डेन युक्तस्तथा
मत्तैस्तुल्यसपादकैस्तु मुकुलो वा शीर्षकैः शेखरः ॥
राज्ञो गृहं छन्दचतुर्यं स्यात्
तथैव घण्टाकलसेन युक्तम् ।
तुङ्गारसंज्ञस्त्वथ सिंहकर्णः
प्रासादके तेऽपि षड़ेव शस्ताः ॥
षड्जातिगेहं तृणपर्णपट्टै-
र्वंशैः काष्ठैर्वापि मृदा शिलाभिः ।
एवं प्रकारैः कथितञ्च षड्भि-
र्लोकप्रसिद्ध्या च परीक्षणीयम् ॥"
इति राजगृहादि ॥*॥

"वामे भागे दक्षिणे वा नृपाणां
त्रेधा कार्य्या वाटिका क्रीड़नार्थम् ।
एकद्वित्रिर्द्दण्डसंख्या शतं स्यान्-
मध्ये धारामण्डपं तोययन्त्रैः ॥
क्षेत्रं सप्तविभागभाजितमतो भद्रञ्च भागत्रयं
तन्मध्ये जलवापिकाजिनपदैरेकांशतो वेदिका
स्तम्भैर्द्वादशभिश्च मध्यरचितः कोणेषु कूपान्वितः
कर्त्तव्यो जलयन्त्र एष विधिवत् भोगाय भूमीभुजाम् ॥
तस्यां चम्पककुन्दजातिसुमनोवल्लयः सुनिर्व्वालुका
जातीहेमसमानकेतकिरपि श्वेता तथा पाटला ।
नारङ्गः करुणा वसन्तलतिका चारक्तपुष्पादिकं
जम्बीरो वदरी च पूगमधुका जम्बूश्च चूतद्रुमाः॥
मालूरः कदली च चन्दनवटावश्वत्थपथ्याशिवा-
चिञ्चाशोककदम्बनिम्बतरवः खर्ज्जूरिका दाड़िमी ।
कर्पूरागुरुकिंशुका हयरिपुः पुन्नागको निम्बुकी
प्रोक्ता नागलता च बीजनिभृता स्यात् तिन्दुकी लाङ्गली ॥
द्राक्षैला शतपत्रिका च बकुला धत्तूरकांकोलकौ
मालस्तालतमालकौ सुनिदरौ मन्दारपारिद्रुमौ ।
अन्ये भोज्यविचित्रखाद्यसुफलास्ते रोपणीया बुधैः
यद्याप्नोति न भूतले शुभतरूंस्तच्चम्पकान् वापयेत् ॥
शाखानां प्रतिषेचनाय च घटीयन्त्रस्तुषारोद्भवे
दोला क्रीड़नखेलनाय रुचिरे वर्षावसन्तोत्सवे ।
बालाप्रौढ़वधूसमध्यवनितागानैर्मनोहारिभि-
र्ग्रीष्मे शारदकेऽथ शीतलजलक्रीड़ा शुभे मण्डपे ॥
इति वाटिका ॥*॥

"तुरङ्गमाणां गृहवामभागे
शाला चतुष्षष्टिकरा विधेया ।
शतार्द्धतो मध्यमिका च दैर्घ्यं
कनीयसी तैर्दशभिर्विहीना ॥
व्यासे च ज्येष्ठा तिथिहस्तमाना
त्रयोदशैकादशकैः क्रमेण ।
तद्बाह्यभित्तिश्च करप्रमाणा
पञ्चार्द्धपञ्चाब्धिकरोदया स्यात् ॥
तेजोहानिमपीहया विदधते पूर्व्वापरास्या नृणां
ते याम्योत्तरतो सुखादि सततं कीर्त्तिर्यशो धान्यकम् ।
कर्त्तव्यो धिषणं प्रतीह कलसस्थानं हिहस्तोदयं
तस्यास्तोरणमुच्छ्रितञ्च मुनिभिर्हस्तैः सुशोभान्वितम् ॥
षष्ट्या साधुद्वयाङ्गुलैर्निगदितो वेदाङ्गुलेनाधिकः
श्रीवत्सस्त्वद्विलाव एव च मनोहारी द्विसप्ताङ्गुलः ।
रागाद्यङ्गुलकैस्तु वाजिविजयोऽशीत्या तथा भैरवः
शान्ताख्यस्तु युगाष्टमात्र उदये मानं हरेः सप्तधा ॥"
इत्यश्वशाला ॥ * ॥

"सिंहद्वारं पूर्व्वमानेन कार्य्यं
त्रिद्वेका वा मालिका स्तम्भशीर्षे ॥
स्यातां मध्ये ताड़कौ रक्षणार्थं
तुल्यौ भागेनाधिकौ वापि सार्द्धौ ॥
भागे दक्षिणवामके च करिणां शाला हरेर्द्दारतः
कर्त्तव्या सुदृढ़ोन्नता च कलसैर्घण्टादिभिर्भूषिता ।
संकीर्णो रसनो नगैर्निगदितो मन्दा मृगाश्चाष्टतः
सर्वेषूत्तमभद्रजातिरुदितो नन्दैः करैरुच्छ्रितः ॥
इति गजशाला ॥*॥

"अष्टोत्तरहस्तशतं पृथुत्वे
नृपालयं चोत्तममेव तस्मात् ।
षष्टाभिरष्टाभिरतो विहीनं
पञ्चैव भागाधिकतोऽपि दैर्घ्यं ॥
अशीतितो राणकरैश्च हीनाः
पञ्चालया भूपसुतप्रियाश्च ।